जरातुरे, त्रि। इति मेदिनी। रे, १५७॥ (जीर्णे। यथा, महाभारते। ३। ११। ६५।
"अथ जर्ज्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्।
भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह॥"
विदीर्णे। यथा, माघे। ४। ०३।
"कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो
मूर्द्ध्नि ग्राव्णां जर्ज्जरा निर्झरौघाः॥")
जर्ज्जरीकः, त्रि, (जर्ज्जति जीर्णो भवतीति। जर्ज्ज + "फर्फरीकादयश्च।" उणां ४। २०। इति ईकन्प्रत्ययेन साधुः।) बहुच्छिद्रद्रव्यम्। जरातुरः। इति मेदिनी। के, १५८॥
जर्भ, ऋ भर्त्से। उक्तौ। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) ऋ, जर्भन्ती जर्भन्ती। भर्त्सनमनर्थकमनम्। इति दुर्गादासः॥
जर्णः, पुं, (जीर्य्यति जीर्णो भवतीति। जॄ + "कृवृजषिद्रुपनीति।" उणां ३।१०। इति नन्।) चन्द्रः। वृक्षः। इति मेदिनी। णे, १३॥ जीर्णे, त्रि। इति हेमचन्द्रः॥
जर्त्तः, पुं, (जायतेऽस्मादिति। जन + बाहुलकात् तप्रत्ययेन साधुः।) योनिः। हस्ती। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अत्र जर्तुरिति पाठो भवितुं युक्तः॥)
जर्त्तिलः, पुं, वनोद्भवतिलः। इति राजनिर्घण्टः हेमचन्द्रश्च॥ (यथा, विष्णुपुराणे। ३।१६।२५।
"श्यामाकास्तथ नीवारा जर्त्तिलाः सगवेधुकाः।
तथा वेणुयवाः प्रोक्तास्तद्वन् मर्कटका मुने॥")
जर्तुः, पुं, (जायते यस्मादिति। जन + "जनेस्तुरः।" उणां ५। ४६। इति तुः रेफश्चान्तादेशः।) योनिः। हस्ती। इत्युणादिकोषः॥
जर्त्स, क भर्त्से। रवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफयुक्तः दन्त्यवर्गाद्योपधः। जर्त्सति। भर्त्सः भर्त्सनमुक्तिश्च। इति दुर्गादासः॥
जर्हिलः, पुं, अरण्यतिलः। इति राजनिर्घण्टः॥
जल, क पिधाने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पिधानमाच्छादनम्। क, जालयति चन्द्रं मेघः। इति दुर्गादासः॥
जल, ज धान्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। अकं इति केचित्।) ज, जालः जलः। धीयते अनेनेति धानं तस्य भावः धान्यं जीवनोपयोगिक्रिया। जलति लोकान् जलम्। जीवयतीत्यर्थः। धीयते आच्छाद्यते अनेनेति धानं तस्य भावः धान्यं आच्छादनक्रिया। जलति जालेन मत्स्यान् जालिक इति वा। गोविन्दभट्टस्तु धनस्य भावः धान्यं सम्पत्तिः। जलति धनी सम्पद्वः स्यादित्यर्थ इत्याह। इति दुर्गादासः॥
जलं, क्लो, गोकलनम्। ह्रीवेरम्। इति मेदिनी। ले, १८॥ (यथा, भावप्रकाशे अरोचकाधिकारे।
"जलं सकणागुरुतक्रकेसरम्।" इति॥ ✻॥
जलति जीवयति लोकान् जलति आच्छादयति भूम्यादीनिति वा। जल + पचाद्यच्।) पानीयम्। पञ्चभूतान्तर्गतभूतविशेषः। अस्य धर्म्माः। रूपं द्रवत्वं प्रत्यक्षयोगित्वञ्च। इदं गुरुरूपविशिष्टञ्च। अस्य गुणाश्चतुर्द्दश। यथा,—
स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२ रसः १३ स्नेहः १४। अस्य वर्णः शुक्लः रसो मधुरः स्पर्शः शीतलः। स्नेहः द्रवत्वं स्वाभाविकगुणः। परमाणुजलं नित्यम्। सावयवजलं अनित्यम्। अनित्यजलं त्रिविधं यथा। देहं अयोनिजम् १ इन्द्रियं रसनम् २ विषयः सिन्धुहिमादिः ३। इति भाषापरिच्छेदः॥ ✻॥
तस्योत्पत्तिर्यथा —
"रूपमात्राद्विकुर्व्वाणात्तेजसो दैवचोदितात्।
रसमात्रमभूत्तस्मादम्भो जिह्वारसग्रहः॥"✻॥
तस्य लक्षणं यथा,—
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः॥"
इति श्रीभागवतम्॥ ✻॥
"अपां शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता।
जिह्वाविस्यन्दनञ्चापि भौमानां श्रपणं तथा॥
चतुर्थमापो विज्ञेयं जिह्वाध्यात्मं प्रचक्षते।
अधिभूतं रसस्तत्र सोमस्तत्राधिदैवतम्॥"
इत्याश्वमेधिकपर्व्व॥ ✻॥
तत्पर्य्यायः। आपः २ स्त्रीलिङ्गबहुवचनान्तोऽयम्। वाः ३ वारि ४ सलिलम् ५ कमलम् ६ पयः ७ कीलालम् ८ अमृतम् ९ जीवनम् १० भुवनम् ११ वनम् १२ कवन्धम् १३ उदकम् १४ पाथः १५ पुष्करम् १६ सर्व्वतोमुखम् १७ अम्भः १८ अर्णः १९ तोयम् २० पानीयम् २१ नीरम् २२ क्षीरम् २३ अम्बु २४ शम्बरम् २५ मेघपुष्पम् २६ घनरसः २७। इत्यमरः।१।१०।३॥ आपः २८ स्त्रीक्लीबोऽयम्। सलिलम् २९ सलम् ३० जडम् ३१ कम् ३२ अन्धम् ३३ कम्पलम् ३४ उदम् ३५ दकम् ३६ नारम् ३७ प्रम्बरम् ३८ अभ्रपुष्पम् ३९ घनरसम् ४० घृतम् ४१। इति भरतः॥ पीप्पलम् ४२ कुशम् ४३ विषम् ४४ काण्डम् ४५ सदरम् ४६ सरम् ४७ कबीटम् ४८ चन्द्रोरसम् ४९ सदनम् ५० कर्व्वुरम् ५१ व्योम ५२ सम्बः ५३ सरः ५४ इरा ५५ वाजम् ५६ तामरम् ५७। इति जटाधरः॥ कम्बलम् ५८ स्यन्दनम् ५९ सम्बलम् ६० जलपीथम् ६१ चरम् ६२ ऋतम् ६३ ऊर्ज्जम् ६४ कोमलम् ६५ सोमम् ६६। इति शब्दरत्नावली॥✻॥ तस्य गुणाः। ईषत्कषायत्वम्। मधुरत्वम्। क्लेदित्वम्। शीतलत्वम्। तृष्णानाशित्वम्। अव्यक्तरसत्वम्। शरीरेन्द्रियतर्पणत्वञ्च॥✻॥ सुगन्धस्य तस्य गुणाः। स्वच्छरसत्वम्। सुशीतत्वम्। तर्पणाशित्वञ्च॥ ✻॥ स्वच्छस्य तस्य गुणाः। लघुत्वम्। हृद्यत्वम्। पुष्टत्वञ्च॥ ✻॥ पर्णशैवालकर्दमयुक्तजलगुणाः। त्रिदोषित्वम्। भ्रमित्वम्। क्लिन्नत्वम्। विवर्णत्वम्। विरसत्वम्। सान्द्रत्वम्। दुर्गन्धित्वम्। अहितकारित्वञ्च॥ ✻॥ दिवा सूर्य्यकिरणरात्रिचन्द्ररश्मिजुष्टजलगुणाः। अरूक्षत्वम्। अनभिष्यन्दित्वम्। गगनाम्बुतुल्यत्वञ्च॥ ✻॥ साधारणजलगुणाः। पथ्यत्वम्। दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च॥ ✻॥ वर्षाकालीनजलगुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। मधुरत्वम्। सारकत्वञ्च॥ ✻॥ शरत्कालीनजलगुणाः। अनभिष्यन्दित्वम्। लघुत्वञ्च॥ ✻॥ हैमन्तिकजलगुणाः। स्निग्धत्वम्। बल्यत्वम्। पथ्यत्वम्। हितकारित्वम्। गुरुत्वञ्च॥ ✻॥ शैशिरजलगुणः। कफवातनाशित्वम्। हैमन्तिकात् किञ्चिल्लघुत्वञ्च॥ ✻॥ वासन्तिकजलगुणाः। कषायत्वम्। मधुरत्वम्। बल्यत्वम्। रूक्षत्वञ्च॥ ✻॥ ग्रैष्मिकजलगुणः। अनभिष्यन्दित्वम्॥ ✻॥ शीतलजलगुणाः। मदमूर्च्छाच्छर्द्दिपित्तज्वरश्रमक्लमभ्रमदाहमदात्ययविषनाशित्वम्॥ ✻॥ भवनाद्यतधारापातजलगुणाः। विष्टम्भित्वम्। दुर्जरत्वञ्च॥ ✻॥ यत् अन्तर्वाष्पशीतलं तत् स्वतशीतं तस्य गुणः। त्रिदोषनाशित्वम्॥ ✻॥ जलस्य सिद्धकरणप्रकारः। हेमन्ते शिशिरे पादहीनं वसन्ते पादास्थितं ग्रीष्मशरत्कालयोरर्द्धावशेषितं वर्षाखष्टावशेषितम्। दिवासिद्धं जलं रात्रौ गुरु रात्रिसिद्धं दिवागुरु॥ ✻॥ पुष्पसुवासितशुक्लवस्त्रपूतनवमृत्पात्रस्थजलगुणः। मङ्गलकान्तिकारित्वम्॥ ✻॥ अजीर्णे जलमौषधं जीर्णे बलप्रदं आहारकाले अमृतजनकं भुक्तान्तोपरि रात्रौ न देयम्॥ ✻॥ रात्रिशेषे जलपानगुणाः। कासश्वासातीसारज्वरवमथुकटीकोष्ठकुष्ठसूत्राघात-उदरार्शःश्वयथुगलशिरःकर्णनासाचक्षुरोगवातपित्तकफक्षयजरागनाशित्वम्॥ ✻॥ मेघशून्यरात्रिशेषे नासिकारन्ध्रेण जलपानगुणाः। बुद्धिकारित्वम्। चक्षुर्हितत्वम्। वलीपलितसर्व्वरोगनाशित्वञ्च॥ ✻॥
"जलञ्चतुर्व्विधं प्राहुरन्तरीक्षोद्भवं बुधाः।
धारञ्च कारकञ्चैव तौषारं हैममित्यपि॥"
इति राजनिर्घण्टः॥ ✻॥
तृषिताय रोगिणेऽपि जलं देयं यथा,—
"पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्।
तस्मात् सर्व्वास्ववस्थासु न कचिद्वारि वार्य्यते॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्व्विमुच्यते॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
तस्माज्जलमवश्यं हि दातव्यं भिषजैः भ्रमन्॥"
इति राजवल्लभः॥ ✻॥
"पादेन घटमुत्थाप्य भाजनं पूरयेज्जलम्।
तज्जलं मदिरातुल्यं भाखरर्श सुरया समम्॥"
इति कर्म्मलोचनम्॥ ✻॥
तस्य दानमाहात्म्यं यथा,—
"अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत।
प्राणदानाद्धि परमं न दानमिह विद्यते॥